## ४५. पीतवर्णः

षष्ठी

दिव्या - माले ! आगच्छति वा ? आपणं गच्छाव ।

माला - आगच्छामि, गच्छाव । कस्य आपणं गच्छाव ?

दिव्या - प्रथमं पादरक्षायाः आपणं गच्छाव । अहो... तत्र एकः आपणः अस्ति ।

आपणिकः - कस्याः कृते पादरक्षा ?

दिव्या - मम कृते एव । तां पीतवर्णां पादरक्षां ददातु । कति रूप्यकाणि ?

आपणिकः - एतस्याः कृते १५० रूप्यकाणि । कृष्णवर्णपादरक्षायाः न्यूनं मूल्यम् ।

दिव्या - पीतवर्णां पादरक्षां दर्शयतु ।

माला - पादरक्षायाः मूल्यम् अधिकम् अस्ति भोः । एषा मास्तु ।

दिव्या - नैव, मम अम्बा पीतवर्णस्य वस्त्रम् आनीतवती । अतः पीतवर्णपादरक्षा आवश्यकी । भवतु आगच्छतु । कङ्कणस्य आपणं । गच्छामः ।

माला - आगच्छतु, किं ? कङ्कणानि अपि पीतवर्णयुतानि एव आवश्यकानि वा ?

दिव्या - आम् सत्यम् । आगामि अगस्तमासस्य चतुर्थे मम मातुलस्य विवाहः भविष्यति । तदा पीतवर्णस्य वस्त्रम्, पीतवर्णस्य कङ्कणम्, पीतवर्णस्य तिलकं, पीतवर्णस्य पादरक्षां च धरिष्यामि । सर्वाणि अपि पीतवर्णस्य एव भविष्यन्ति ।

माला - तर्हि अहम् एकम् उपायं वदामि किम् ?

दिव्या - वदतु, वदतु ?

माला - भवत्याः मातुलस्य विवाहपर्यन्तं दन्तधावनं मा करोतु । तदा भवत्याः दन्ताः अपि पीतवर्णाः भवन्ति ।